22E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे – २०२५**

**सत्र ६ वे**

**विषयः मेघदूत (22E463)**

**दिनांक :** १५/०५/२०२५ **गुण :**१०० **वेळ :** स. १०.०० ते १.००

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. त्रयाणां श्लोकानां माध्यमभाषया अनुवादं लिखत।** (१५)

१) तां जानीथाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्।।

२) मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगन्धः।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः।।

३) शेषान् मासान् विरहदिवसस्थापितस्यावधेर्वा विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।
संभोगं वा हृदयनिहितारम्भमास्वादयन्ती प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः।।

४) शामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान् हन्तैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति।।

**प्र.२.अ** यक्षपत्न्याः मनोव्यथां सविस्तरं विवृणुत। (३०)

**अथवा**

कालिदासस्य लेखनविशेषाः स्पष्टीकर्तव्याः।

**प्र.३. पञ्चानां वाक्यानां ससन्दर्भ स्पष्टीकरणं लिखत।** (३०)

१) रिक्तः सर्वो भवति हि लघु

२) सङ्गमात् किञ्चिदूनः।

३) सूर्यापाये न खलु कमलं पुष्पति स्वामाभिख्याम्।

४) सृष्टिराद्यैव धातुः।

५) न खलु वयो यौवनादन्यदस्ति।

६) वर्णमात्रेण कृष्णः।

७) त्वं हि तस्य प्रियेति।

**प्र.४. उज्जयिन्याः अथवा अलकानगर्याः वर्णनं सविस्तरं लिखत।** (२५)

----------